# संकलनात्मकं मूल्यांकनम् (SA II)

## कक्षा - दशमी - संस्कृतम् - द्वितीयसत्रम्

**समय : होरा त्रयम्** **पूर्णाङ्काः : 90**

*निर्देशाः 1) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*

*खण्ड - क. अपठित अवबोदधनम् - 10 अङ्काः*

*खण्ड - ख. रचनात्मक कार्यम् - 15 अङ्काः*

*खण्ड - ग अनुप्रयुक्त व्याकरणम् - 30 अंकाः*

*खण्ड - घ पठिताबबोधनम् - 35 अंकाः*

*2) सर्वे प्रश्नाः अनिवार्याः*

*3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणलेखनीयानि*

*4) प्रश्नसंख्या अवश्य लेखनीया*

*5) उत्तराणि संस्कृते एव लेखनीयानि।*

---

### खण्ड - क - अपठित - अवबोधनम्

**क.1. अधोलिखितं अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -**

दीपावली प्राचीनतमं पर्व। अस्मिन् दिने सर्वाधिक आकर्षकं मनोरञ्जनं भवति स्फोटकानाम् आस्फोटनम्। विचित्राणि वर्णयुक्तानि स्फोटकानि आकाशे भूमौ च विविधरूपाणि दर्शयन्ति। जनाः तानि दृष्ट्वा तुष्यन्ति। परन्तु अति सर्वत्र वर्जयेत्। रात्रौ आस्फोटकानां शब्दः कर्णौ बधिरि करोति वायुमण्डलं च दूषयति। पूर्वं जनसंख्या सीमिता आसीत्। वृक्षाः वायुं शुद्धं कुर्वन्ति स्म। इदानीम् जनसंख्या प्रवृद्धा, वृक्षसंख्या क्षीणा। विस्फोटकेभ्यः निर्गतः धूमः रुग्णान् पीडयति, नवजातशिशुभ्यः हानिकरः सिध्यति। दीपावली-समये शरदि आकाशः निर्मलः भवति। सर्वत्र पवित्रता विराजते। अतः वयम् आनन्देन दीपावलीम् मानयेम, वसुन्धरां भूषितां कुर्याम न तु दूषिताम्। सर्वेषां जीवनं सुखमयं भवेत्। किं तेन उत्सवेन सः कस्मैचित् अपि कष्टकरः भवेत्? 'मा कश्चिद् दुःखभाग भवेत् इति अस्माकम् आदर्शः। 10

प्रश्नाः

I. **एकपदेन उत्तरत।** ($^1/_2$x4=2)

*i)* केषाम् आस्फोटनम् सर्वेभ्यः आकर्षकम् मनोरञ्जकम् च?

*ii)* दीपावली कस्यां ऋतौ भवति?

*iii)* के वायुं शुद्धं कुर्वन्ति?

*iv)* सर्वोषां जीवनं कीदृशं भवेत्?

II **पूर्णवाक्येन उत्तरत।** ($^1/_2$x4=2)

*i)* अस्माकं कः आदर्शः?

*ii)* स्फोटकानां धूमः कान् पीडयति?

III **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** (2x1=2)

**IV भाषिककार्यम्।** (1x4=4)

*i)* 'प्रवृद्धा' इत्यस्य किं विलोमपदम् उत्र प्रयुक्तम्?

क) क्षीणा ख) निर्गतः ग) दूषिता घ) निर्मला

*ii)* 'सर्वत्र पवित्रता विराजते' अत्र किं अव्ययपदम्?

क) पवित्रता ख) विराज ग) विराजते घ) सर्वत्र

*ii)* 'पर्व' इत्यस्य किं विशेषणम् अत्र प्रयुक्तम्?

क) सर्वाधिकं ख) प्राचीनतमम् ग) प्राचीनं घ) पूर्वम्

*iv)* 'लाभकरः' इत्यस्य किं विपर्ययपदं प्रयुक्तम्?

क) पवित्रकारः ख) न्यूनतरः ग) निर्गतः घ) हानिकरः

**खण्ड - ख - रचनात्मकं कार्यम् - 15 अङ्काः**

ख. 2. भवतां नाम सैरभः। भवतां विद्यालये वार्षिकोत्सवे संस्कृतनाटकस्य मञ्चनं भविष्यति। एतदर्थं स्वमित्रं गौरवं प्रति लिखितं निमन्त्रणपत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत। (10x$^1/_2$=5)

सर्वोदयविद्यालयः,

*(i)*....................।

तिथी : 01.07.20.......

प्रियमित्र *(ii)* ............

दीपावलिपर्वणः शुभाशंसाः। अत्र *(iii)* ................ कुशलम्। भवान् अपि *(iv)* ..............इति मन्ये। अस्माकं विद्यालयस्य वार्षिकोत्सवः *(v)*..................पर्वणः शुभावसरे भविष्यति। तत्र अस्माकं पुस्तकस्य 'रमणीया हि सृष्टिः एषा' इति नाटकस्य *(vi)*.................भविष्यति। अहं तस्मिन् नाटके काकस्य अभिनयं *(vii)*........। भवान् अवश्यमेव तत् *(viii)* ..............अगच्छतु। मम अपि उत्साहवर्धनम् भविष्याति। सर्वेभ्यः अग्रजेभ्यः मम *(ix)* ............ निवेद्यताम् इति।

भवदीयः वयस्यः

*(x)* .....................

| |
|---|
| मञ्जूषा - द्रष्टुम्, दिल्लीतः, सर्वगत, प्राणामाञ्जलिः, कुशली, मञ्चनम्, गौरव!, दीवावल्याः, करिष्यामि, सौरभः। |

ख 3 **चित्रम् आधृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृते पञ्च वाक्यानि लिखत**

(5x2=10)

**मञ्जूषा -** पुष्पाणि, दोलाम्, सूर्यः, भगिनी - भ्रातरौ, द्वे - वर्तिके, आकाशे, वृक्षः, महिला, उपवनम्, राजमार्गः।



**खण्ड - ग - अनुप्रयुक्त व्याकरणम् 30 अंका**

ग.4. अधोलिखितवाक्येषु रेखांकित पदानां समुचितं सन्धिं सन्धिच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत- (5x1=5)

1. हरिश्चलति विद्यालयं प्रति।
   क) हरिश् + चलि ख) हरिसम + चलति ग) हरिः + चलति
   घ) हरिर् + चलति।
2. पश्य पश्य तत् रमणीयं भवनम्।
   क) भव + अनम् ख) भौ + अनम् ग) भू + अनम् घ) भो + अनम्।
3. विशालौ पर्वताविव
   क) पर्वतौ + इव ख) पर्वतो + इव ग) पर्वताः + विव
   घ) पर्वत + आविव।
4. सन्तोषः एव सत् + निधानम्।
   क) सन्निधानम् ख) सद्निधानम् ग) सङ्निधानम् घ) सालिधानम्
5. आश्रमे उभौ+अपि अतिथी तिष्ठतः।
   क) उभवपि ख) उभवपि ग) उभावपि घ) उभौअपि।

ग.5. **अधोलिखित वाक्येषु रेखांकित पदानां समासं विग्रहं वा विकल्पेभ्यः चित्वा लिखत -**

(6x1=1)

1. **ग्रीष्मवसन्तशिशिराः** ऋतवः उत्तरायणे भवन्तिय़
   क) ग्रीष्मं च वसतं च शिशिरं च
   ख) ग्रीष्मः च वसन्तः च शिशिरः च
   ग) गीष्माः च वसन्ताः च शिशिरे च।
   घ) ग्रीष्मे च वसन्ते च शिशिरे च।

2. अस्मिन् विद्यालये प्रत्येकम् छात्रः परिश्रमी अस्ति।

क) एकम्-एकम् प्रति ख) एके-एके ग) एकस्मिन् - एकस्मिन्

घ) एकः च एकः च।

3. अधुना मम माता च पिता च आगच्छतः।

क) मातापितौ ख) मातापितरौ ग) मातापितरौ घ) मातपितः।

4. नीलकण्ठः शिवः हिमालये तपते।

क) नीलः कण्ठः यस्य सः ख) नीलः कण्ठः ग) नीलम् कण्ठम् सः

घ) नीलम् कण्ठः।

5. भोजनसमये तौ पाणी च पादै च प्रक्षालयतः।

क) पाणिपादौ ख) पाणीपादौ ग) पाणिपादम् घ) पाणिपादः।

6. रामः च लक्षणः च ऋषि - विश्वामित्रस्य शिष्यौ आस्ताम्।

क) रामलक्ष्मणः ख) रामलक्ष्मणोः ग) रामलक्ष्मणम् घ) रामलक्ष्मणौ।

ग.6. **अधोलिखित वाक्येषु रेखांकित पदानां प्रकृतिः प्रत्ययः च पृथक् कृत्वा संयोज्य वा लिखत - (विकल्पेभ्यः चित्वा लिखत)** (5x1=5)

1) सा तु स्वभावेन अतीव................ **(सरल + टाप्)** अस्ति।

क) सरलता ख) सरला ग) सरलटा घ) सरलताप्।

2) अद्य अस्माकं **(वर्ष ठक् ङ़ीप्)** ................ परीक्षा आरभते।

क) वार्षिकी ख) वार्षिकी ग) वार्षकी घ) वर्षकी

3) जनकं **(सेव् शानच्)**............ पुत्रः प्रसन्नोऽस्ति।

क) सेववानः ख) सेवमानः ग) सेव्यमानः घ) सेव्यवानः।

4) पुरस्कारं **(लभ् शानच्)** .............. छात्रः प्रसन्नः भवति।

क) लभमानः ख) लभमानं ग) लभमानाः घ) लभमाना।

5) प्रकृतेः **(रमणीय + तल्)** ............... दर्शनीया अस्ति।

क) रमणीयता ख) रमणीयतां ग) रमणीया घ) रमणीयां

ग.7. **मञ्जुषातः उचितं अव्ययपदं चित्वा रिक्तस्थानानि पूरयत** (5x1=5)

क) ................... मम मातुलः काश्मीरात् आगमिष्यति।

ख) असत्यं.................वद।

ग) ................... स्थास्यान्ति गिरयः तावत् रामायणी कथा प्रचरिष्यति।

घ) कच्छपः .................. न धावति।

ङ) अस्माकं जीवनं ....................... वर्तते?

**मञ्जूषा -** | यावत्, श्वः, मा, कदापि, किमर्थम्। |

ग.8. **अधोलिखितानि वाक्यानि अङ्कानां स्थाने संस्कृतसंख्यावाचकविशेषणैः पूरयित्वा लिखत** (4x1=4)

1) वेदाः ................. (4) सन्ति।
2) पुराणानि ............... (18) सन्ति।
3) भासः ................ (13) नाटकानि अलिखत्।
4) वृक्षे ................ (3) कोकिलाः सन्ति।

**ग.9. अधोलिखित वाक्येषु काश्चन अशुद्धयः सन्ति। तासां संशोधनं कृत्वा लिखत -**(5x1=5)

1) सा बालकः भोजनं खादति।
2) त्वया सह के गच्छति?
3) किं सा श्वः आगच्छत?
4) किं त्वम् अपि खादिष्यति?
5) अहम् विद्यालयं गच्छन्ति।

## खण्ड घ - पठित अवबोधनम् (35 अंका)

**घ. 10. अधोलिखितं गद्यांश पठित्वा प्रश्नान् उत्तरत -**

अ) अथ पूर्वमित्रं दुष्टबुद्धिः प्रच्छन्नभागयस्य धनागमवृत्तान्तं श्रुत्वा कदचित् मध्यरात्रे तस्य एव गृहे चौर्यार्थं सन्धि - खननसुयोगम् विलोकयन् स्थितः। तस्मिन्नेव काले सुप्तोत्थितः प्रच्छन्नभाग्यः सम्भ्रान्तचितः स्वपत्नीं सम्बोध्य अवाच - अहो विचित्रः स्वप्नो मया दृष्टः अस्माकं क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरितः कलशः विद्यते इति। तच्छ्रुत्वा परद्रव्ये अनासक्ता सा न्यवेदयत्- नाथ! विरम अस्माद् लोभात्।

दुष्टबुद्धिः तु तयोः वार्ताम् श्रुत्वा झटिति एव क्षेत्रं गतः। तत्र अश्वत्थामूलं खनित्वा तं सुवर्णकलशं प्राप्तवान्। यदा स तस्य आवरणम् अपसारयति तदेव भयङ्करम् एकं विषधरं फूत्कारं कुर्वन्तं पश्यति। भीतः स कलशं पुनः आवृत्य तम् च आदाय मित्रस्य गृहं समागतः। स्वमित्रं सर्पेण मारयितुम् इच्छन् सः भित्तौ सन्धिं प्रकल्प्य तन्मध्यतः कलशं गृहाभ्यन्तरे क्षिप्तवान्।

I) **एकपदेन उत्तरत-** ($^1/_2$x4=2)

i) दृष्टबुद्धिः कस्य गृहम् चौर्यार्थम् आगच्छत्?
ii) सुवर्णपूरितः कलशः कस्य वृक्षस्य मूले आसीत्?
iii) दुष्टूबुद्धिः सुवर्ण कलशे किम् अपश्यत्?
iv) प्रच्छन्नबुद्धिः कां स्वस्वप्नम् अश्रावयत्?

II) **पूर्णवाक्येन उत्तरत -** (1x1=1)

दुष्टबुद्धिः सुवर्णकलशं गृहाभ्यन्तरे किमर्थं क्षिप्तवान्?

III) **भाषिककार्यम्-** (2)

i) 'नाथ! विरम अस्मात् लोभात्' इति कथनं का कथयति? ($^1/_2$)

क) प्रच्छन्नभाग्यः ख) पत्नी ग) प्रच्छन्नभाग्यस्य पत्नी घ) चौरः

ii) 'भीतः सः कलशं पुनः आवृत्य मित्रस्य गृहम् आगतः 'अस्मिन् वाक्ये' 'सः' इति पदं कस्मै प्रयुक्तम्? ($^1/_2$)

क) दुष्टबुद्धये ख) प्रच्छन्न भाग्याय ग) मित्राय घ) बालकाय

iii) 'सुप्तोत्थितः प्रच्छन्नभाग्यः' अत्र किं पदं विशेषणपदम्? ($^1/_2$)

क) प्रच्छन्नभाग्यः ख) प्रच्छन्नः ग) सुप्तोत्थितः घ) उत्थितः

iv) अनुच्छेदे 'क्षिप्तवान्' इति क्रियापदस्य कर्तृपदं किम्? ($^1/_2$)

क) भित्तौ ख) सन्धिं ग) कलशं घ) सः

**घ.10) आ) अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत - 5**

**बकः** (प्रविश्य, स्वपक्षौ अवधूय) कथं माम् अपि अधिक्षिपसि। किं ते महत्वम्? वर्षर्तौ तु मानसं पलायसे। अहम् एव अत्र वृष्टेः अभिनन्दनं करोमि। कीदृशी तव मैत्री? आपत्काले सरांसि त्यक्त्वा दूरं वजसि। वस्तुतः अहमेव शीतले जले बहुकालपर्यन्तम् अविचलं ध्यानमग्नः 'स्थितप्रज्ञ' इव तिष्ठामि। दुग्धधवला मे पक्षाः। न जाने कथं माम् अपरिगणयन्तः जनाः चित्रवर्णं अहिभुजं मयूरं 'राष्ट्र-पक्षी' इति मन्यन्ते। अहमेव योग्यः।

**मयूरः** (प्रविश्य, साट्टहासम्) सत्यं सत्यम्। अहमेव राष्ट्रपक्षी। को न जानाति तव ध्यानावस्थाम्? मैनं धुत्वा वरकान् मीनान् छलेन अधिगृह्य, क्रूरतया भक्षयसि। धिक् त्वाम्! अवमानितं खलु सर्वं पक्षिकुलं त्वया।

**काकः** रे सर्पभक्षक! नर्तनात् अन्यत् किम् अपरं जानासि?

**मयूरः** श्रूयतां श्रूयताम! मम नृत्यं तु प्रकृतेः आराधना। पश्य! चारुवर्तुलचंद्रिकाशोभितानां मम पिच्छानाम् अपूर्वं सौन्दर्यम्। मम केकारवं श्रुत्वा कोकिलः अपि लज्जते। मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः।

I) **एकपदेन उत्तरत -** ($^1/_2$x4=2)

i) मयूरस्य नृत्यं कस्याः आराधना?

ii) हंसः कदा मानसं पलायते?

iii) मयूरः केन पक्षिराजः कृतः?

iv) केन पक्षिकुलम् अवमानितम्?

II) **पूर्णवाक्येन उत्तरत** (1x1=1)

बकः मीनान् कथं भक्षयति?

III) **यथानिर्देशम् उत्तरत** ($^1/_2$x4=2)

i) 'दुग्धधवला मे पक्षाः' अस्मिन् वाक्यांशे किम् विशेषणपदम्?

क) मे ख) दुग्धधवला ग) धवला घ) पक्षाः

ii) अहमेव योग्यः। अत्र 'अहम्' पदं कस्मै प्रयुक्तम्?

क) बकाय ख) काकाय ग) मयूराय घ) राजहंसाय

iii) 'रे सर्पभक्षक!' इति कथयित्वा काकः कम् सम्बोधयति?

क) बकम् ख) हंसम् ग) हंसीम् घ) मयूरम्

iv) 'तिरस्कृतम्' इति अस्मिन् अर्थे किं क्रियापदं नाट्यांशे प्रयुक्तम्?

क) सम्मानितम् ख) अपमानितम् ग) अवमानितम् घ) अपमानितम्

**घ.10) इ) अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत** **5**

*पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।*
*पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।। 1 ।।*

I) **एकपदेन उत्तरत-** ($2x^1/_2=1$)

i) विद्याधनं कः यच्छति?

ii) पिता पुत्राय विद्याधनम् कदा यच्छति?

II) **पूर्णवाक्येन उत्तरत -** (2x1=2)

i) पिता कस्मै विद्याधनम् यच्छति?

ii) अत्र धनम् किम् अमन्यत?

III) **भाषिककार्यम्-** ($4x^1/_2=2$)

i) 'विद्याधनम्' श्लोके अस्य विशेषणपदं किम्?

क) महत् ख) बाल्ये ग) किम् घ) पिता

ii) श्लोके अव्ययवदं किम्?

क) किम् ख) तपः ग) इति घ) तेपे

iii) 'तेपे' इति क्रियायाः कर्तृपदं किम्?

क) पुत्रः ख) नारुः ग) तप घ) पिता

iv) 'कथनम्' इति अर्थे किं पदं प्रयुक्तम्?

क) उक्तिः ख) अस्य ग) तपस्तेपे घ) तपः

**घ.11) अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः समुचितक्रमेण पूरयत -** (1x4=4))

***वाक्पटु धैर्यवान् मन्त्री सभायामप्यकातरः।***
***स केनापि प्रकारेण परैर्न परिभूयते।।***

**अन्वयः-** (यः) *(i)* मन्त्री ..................... धैर्यवान् सभायाम् *(ii)*.................. अकातारः (अस्ति) सः *(iii)*................ केन अपि प्रकारेण न *(iv)*..................

**मञ्जूषा -** | अपि, परिभूयते, वाक्पटुः, परैः |

**घ.12) अधोलिखितं पद्याशस्य भावार्थम् मञ्जूषायाः उपयुक्तपदैः पूरयित्वा पुनः उत्तर पुस्तिकायां लिखत -** (1x4=4))

***त्यकत्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।***
***परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।।***

**भावार्थः** - यः मूर्खः मनुष्यः *(i)*.................. वाणीं त्यक्त्वा कठोरां *(ii)*..................... उच्चारयति, सः नूनं *(iii)*.................... फलं विहाय *(iv)*.........................फलं खादति।

**मञ्जूषा -** | वाणीम्, पक्वम्, अपक्वम्, धर्मप्रदां |

**घ.13) अधोलिखित वाक्येषु रेखांकित पदं आश्रित्य प्रश्नानिर्माणं कुरुत -** (1x4=4))

1. दुष्टबुद्धि कलशे <u>विषधरम्</u> अपश्यत्।
2. <u>जलबिन्दु निपातेन</u> क्रमशः घटः पूर्यते।
3. 'ईटानगरं' <u>अरुणाचल प्रदेशस्य</u> राजधानी।
4. संवत्सरे <u>षड्</u> ऋतवः भवन्ति।

**घ.14. अधोलिखित वाक्यानि घटना क्रमेण पुनः लेखनीयानि।** **4**

i) युष्माभिः एव में शोभा अतः यूयम् सर्वे मम प्रियाः।

ii) ते सर्वे आत्मनः महत्वं प्रतिपादयन्तः अन्योऽन्यान् निन्दन्ति।

iii) एकदा प्रभाते राजहंसः राजहंसी च सरस्तीरे भ्रमतः।

iv) निन्दां श्रुत्वा काकः तत्रागत्य आत्मानं प्रशंसति।

v) अतः कलहं विहाय परस्परं मोदध्वं, जीवनं च समयं कुरुध्वम्।

vi) तदा बकः, मयूरः, पिकः च क्रमेण तत्र आगच्छन्ति।

vii) अन्ते प्रकृतिमाता तत्रागत्य कथयति।

viii) तौ काकध्वनिं श्रुत्वा तं निन्दतः।

घ.15 **उचितं शब्दार्थ मेलनं कुरुत** **4**

| | | |
|---|---|---|
| 1) सहस्रांशु | - | घटः |
| 2) शैलः | - | वायुः |
| 3) पवनः | - | अग्नि |
| 4) पर्जन्यः | - | भूमिः |
| 5) वह्निः | - | शोभते |
| 6) मही | - | पर्वतः |
| 7) भासते | - | मेघः |
| 8) कलशः | - | सूर्यः |